Roll No.
रोल नं.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

**Series RKM** **Code No. कोड नं. 52**

- Please check that this question paper contains 15 printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains 18 questions.
- Please write down the serial number of the question before attempting it.
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 15 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में 18 प्रश्न हैं।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।

# COMMUNICATIVE SANSKRIT

# संस्कृतम् (सम्प्रेषणाधारितम्)

*अवधि : होरात्रयम्* *पूर्णांक : 100*
*Time allowed : 3 hours* *Maximum Marks : 100*
*निर्धारित समय : 3 घण्टे* *अधिकतम अंकः : 100*

खण्डः क : अपठितांश-अवबोधनम् / अपठित-अवबोधन 15 अंकः
Section A : Unseen Reading Comprehension

खण्डः ख : रचनात्मककार्यम् / रचनात्मक-कार्य 20 अंकः
Section B : Writing Skills

खण्डः ग : अनुप्रयुक्तव्याकरणम् / अनुप्रयुक्त व्याकरण 30 अंकः
Section C : Applied Grammar

खण्डः घ : पठित-अवबोधनम् / पठित-अवबोधन 35 अंकः
Section D : Reading Comprehension

***Instructions :***
***निर्देशः :***

(i) *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
*इस प्रश्न-पत्र में चार खण्ड हैं।*
*There are four sections in this questions paper.*

(ii) *प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर पृथक् दी गई उत्तर-पुस्तिका में ही लिखने हैं।*
*The answers have to be written in a separate answer-sheet.*

(iii) *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम में लिखने होंगे।*
*The answers to each section must be written at one place.*

(iv) *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
*प्रश्न-पत्र पर उत्तर न लिखें।*
*Don't write answers in the question paper.*

(v) *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*
*प्रश्न-पत्र के अनुसार प्रश्न संख्या अवश्य ही लिखनी होगी।*
*Write the question number according tothe question paper.*

(vi) *सर्वेषां प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि।*
*सभी प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए।*
*Answer all the questions in* ***Sanskrit.***

## खण्डः क (Section A)
## अपठितांश-अवबोधनम् (अपठित-अवबोधन)
## Unseen Reading Comprehension 15 अंकः

**1.** अधोलिखित-अनुच्छेद**द्वयं** पठित्वा प्रदत्तप्रश्नान् पृथक प्रदत्तायाम् उत्तरपुस्तिकायाम् उत्तरत :
निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर पृथक् दी गई उत्तर-पुस्तिका में लिखिए :
Read the following **two** passages and answer the questions in the given answer-sheet :

(क) प्रथमः अनुच्छेदः

अस्माकं जीवने यः समयः अतीतः स तु गतः, अतः तस्य विषये चिन्ता न करणीया। अवशिष्टं जीवनं सार्थकं कुर्याम। दिने-दिने स्वार्थः न्यूनः भवेत्, परार्थः अधिकाधिकः भवेत्। अस्मिन्नेव सुखस्य रहस्यमस्ति। 'स्वस्मै स्वल्पं, समाजाय सर्वस्वम् इति उक्तेः अनुसारं जीवने एव जीवनस्य सार्थकता अस्ति। एवं जगत् इतः अपि सुन्दरतरं भवेत्।

**प्रश्नाः**

I. एकपदेन उत्तरत :

एक शब्द में उत्तर दीजिए :

Answer in one word : ½×4=2

(i) प्रतिदिनं कः न्यूनः भवेत् ?

(ii) प्रतिदिनं कः अधिकाधिकः भवेत् ?

(iii) वयं कस्मै सर्वस्वम् अर्पयाम ?

(iv) इतः अपि सुन्दरतरं किं भवेत् ?

II. पूर्णवाक्येन उत्तरत :

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence : 1×1=1

जीवनस्य सार्थकता कस्याः उक्तेः अनुसारं जीवने अस्ति ?

III. यथानिर्देशं उत्तरत :

यथानिर्देश उत्तर दीजिए :

Do as directed : ½×4=2

(i) अतीतः इति पदस्य किं समानार्थकं पदम् अत्र प्रयुक्तम् ?

(ii) अवशिष्टम् इति पदं कस्य पदस्य विशेषणम् ?

(iii) 'तस्य विषये' इत्यत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) अस्मात् इति स्थाने किम् अव्ययपदं प्रयुक्तम् ?

(ख) द्वितीयः अनुच्छेदः

जिह्वायाः माधुर्यं स्वर्गं प्रापयति, जिह्वायाः कटुता नरके पातयति। एकः एव शब्दः जीवनं विभूषयेत्, अन्यः एकः शब्दः जीवनं नाशयेत्। एकदा द्वयोः धनिनोः मध्ये विवादः उत्पन्नो जातः। तौ न्यायालयं गतौ। एकः धनिकः अचिन्तयत् — अहं लक्षं रूप्यकाणि न्यायाधीशाय यच्छामि इति। सः स्यूते लक्षं रूप्यकाणि स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीशः तस्य मन्तव्यं ज्ञात्वा क्रुद्धः अभवत्। धनिकः अवदत् — भोः मत्सदृशाः लक्षरूप्यकाणां दातारः दुर्लभाः एव। न्यायाधीशः अवदत् — लक्षरूप्यकाणां दातारः कदाचित् अन्ये अपि भवेयुः परन्तु लक्षरूप्यकाणां निराकर्त्तारः मत्सदृशाः अन्ये विरलाः एव। अतः कृपया गच्छतु। न्यायस्थानं मलिनं मा कुरु। लज्जितः धनिकः धनस्यूतं गृहीत्वा ततः निर्गतः।

**प्रश्नाः**

I. एकपदेन उत्तरत :

एक शब्द में उत्तर दीजिए :

Answer in one word : ½×4=2

(i) धनिकः धनम् आदाय कस्य गृहं गतवान् ?

(ii) कस्याः कटुता नरके पातयति ?

(iii) केषां निराकर्त्तारः विरलाः एव ?

(iv) एकः एव शब्दः किं विभूषयेत् ?

II. पूर्णवाक्येन उत्तरत :

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence : 2×2=4

(i) कः न्यायस्थानं मलिनं कर्तुम् इच्छति स्म ?

(ii) न्यायाधीशः किमर्थं क्रुद्धः अभवत् ?

III. यथानिर्देशं उत्तरत :

यथानिर्देश उत्तर दीजिए :

Do as directed : ½×4=2

(i) 'लज्जितः' इति पदं कस्य विशेषणम् ?

(ii) 'सुलभाः' इति पदस्य विलोम पदं किम् अत्र प्रयुक्तम् ?

(iii) 'तौ न्यायालयं गतौ' इति वाक्ये 'तौ' इति पदं काभ्यां प्रयुक्तम् ?

(iv) 'अतः कृपया गच्छतु' इति कः कं कथयति ?

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए।

Write a suitable title for this paragraph. 2

## खण्डः ख (Section B)
## रचनात्मककार्यम् (रचनात्मक-कार्य)
## Writing Skills

20 अंकः

**2. पत्रलेखनम्**

भवान् 'चन्द्रः'। भवतां विद्यालये संस्कृतस्य सम्भाषणशिविरम् आयोजितम् आसीत्। स्व-अनुभवान् वर्णयन् भवान् स्वमित्रं सुरेशं प्रति पत्रं लिखति परन्तु मध्ये कानिचित् पदानि त्यक्तानि। पत्रं पूरयित्वा पुनः उत्तरपुस्तिकायां लिखतु। सहायतायै अधः मञ्जूषा दत्ता।

आप 'चन्द्र' हैं। आपके विद्यालय में संस्कृत का सम्भाषण-शिविर आयोजित किया गया था। आपने अनुभवों का वर्णन करते हुए आप अपने मित्र सुरेश को पत्र लिखते हैं परन्तु बीच में कुछ शब्द छोड़ देते हैं। पत्र को पूरा करके पुनः उत्तर-पुस्तिका में लिखिए। सहायता के लिए नीचे मञ्जूषा दी गई है।

You are 'Chandra'. A Sanskrit-speaking camp was organized in your school. Relating your experienes you write a letter to your friend Suresh but leave some words in between. So complete the letter and rewrite it in your answer-sheet. You can take help from the words given in the box below : ½×10=5

अ 77, शालीमार बाग

(i)__________

दिनाङ्कः__________

प्रिय (i)__________

(iii)__________

अत्र सर्वगतं कुशलम्। मन्ये भवान् अपि कुशली। गतसप्ताहे अस्माकं विद्यालये संस्कृत-सम्भाषणशिविरम् आयोजितम् आसीत्। दश दिनानि वयम् संस्कृतेन सम्भाषणस्य (iv)__________ कृतवन्तः। एकस्याः लघुनाटिकायाः मञ्चनमपि (v)__________ अकुर्म। अहम् तु विदूषकस्य (vi)__________ कृतवान्। सर्वे जनाः हसित्वा (vii)__________ वारं वारं करतलध्वनिम् अकुर्वन्। अहम् तु इदानीं सर्वदा संस्कृतेन एव वदामि। मम शिक्षकाः अपि (viii)__________ स्नेहं कुर्वन्ति। त्वम् अपि प्रयत्नं कुरु। नूनं यशस्वी भविष्यसि।

पितरौ (ix)__________ मम प्रणामाञ्जलिं निवेदयतु।

भवताम् अभिन्नहृदयः,

(x) __________

**मञ्जूषा**

| |
|---|
| चन्द्रः, इन्द्रपुरीतः, हसित्वा, अभ्यासं, सुरेश, प्रति, सस्नेहं नमस्ते, वयम्, अभिनयं, मयि। |

**3. संवादलेखनम्**

अधोलिखितं संवादं मञ्जूषाप्रदत्तपंक्तिसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत :

निम्नलिखित संवाद को मञ्जूषा में प्रदत्त पंक्तियों की सहायता से पूरा करके पुनः उत्तर-पुस्तिका में लिखिए :

Complete the following dialogue with the help of the statements given in the box and rewrite in your answer-sheet : 1×5=5

राघवः - भो रमणीक! भवान् कथम् ईदृशः महान् जातः ?

रमणीकः - (i) ____________________

राघवः - भोः! कथं मूर्खाणां कृपया भवान् बुद्धिमान् जातः ?

रमणीकः - (ii) ____________________

राघवः - एवम्। परेषाम् अनुभवात् शिक्षां गृहीत्वा भवान् बुद्धिमान् जातः किम् ?

रमणीकः - (iii) ____________________

राघवः - कः तावत् मूर्खः ?

रमणीकः - (iv) ____________________

राघवः - कः तावत् मूर्खतमः ?

रमणीकः - (v) ____________________

**मञ्जूषा**

- सत्यम्। यः परेषाम् अनुभवात् शिक्षते स एव बुद्धिमान्।
- यः न अन्यस्य न चापि आत्मनः अनुभवात् शिक्षते।
- यः परस्य अनुभवात् न शिक्षते, पुनः आमूलात् प्रयत्नं करोति।
- मूर्खाणां कृपया एव।
- आम्। अहं मूर्खैः कृतानि कार्याणि अपश्यम् तानि अत्यजम्।

4. **चित्रवर्णनम्**

पञ्चसु संस्कृतवाक्येषु मञ्जूषापदसहायतया अधोलिखितं चित्रवर्णनं कुरुत -

पाँच संस्कृत वाक्यों में मञ्जूषा के शब्दों की सहायता से निम्नलिखित चित्र का वर्णन कीजिए :

Describe the following picture in five Sanskrit sentences with the help of words given in the box : 2×5=10



**मञ्जूषा**

| |
|---|
| एकः, चतस्रः, शाखाः, पञ्च खगाः, हरितः, पत्रैः पूर्णः, शुकः, सारिका, कोकिला, चटका, काष्ठच्छेदकः, विशालः, स्कन्धः, बालकाः, बालिकाः, तिष्ठन्ति, उपविशन्ति, मण्डलाकारे, परितः, सन्देशः, अस्माकं, वृक्षाणां, संरक्षणम्, कर्तव्यम्, वृक्षः। |

**अथवा (OR)**

**केवलं प्रज्ञाचक्षुर्भ्यः (केवल नेत्रहीनों के लिए)**

**For Blind Candidates only**

''विद्यालये वृक्षाणां संरक्षणार्थं अस्माभिः किं किं करणीयम्'' इति पञ्चसु संस्कृतवाक्येषु लिखत। साहाय्यार्थं मञ्जूषायां पदानि दत्तानि।

''विद्यालय में वृक्षों के संरक्षण के लिए हमें क्या-क्या करना चाहिए'' इस विषय पर पाँच संस्कृत वाक्यों में लिखिए। सहायता के लिए मञ्जूषा में शब्द दिए गए हैं।

"What should we do for the conservation of trees in the schools ?" Write five sentences in Sanskrit on this topic with the help of words given in the box.

**मञ्जूषा**

| |
|---|
| वृक्षाः, परोपकारकाः वाटिकायां वृक्षारोपणम्, प्रत्येकं छात्रः, पादपान् सिञ्चेत्, जलेन, हानिं न कुर्यात्, आनयेत्, वर्धयेत्, संरक्षणम्, ज्ञानम्, वार्ताः, उत्तमपादपप्रदर्शनी। |

## खण्डः ग (Section C)
## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)
**Applied Grammar** 30 अंकः

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिच्छेदं सन्धिं वा विधाय उत्तरपुस्तिकायां लिखत :

निम्नलिखित वाक्यों में रेखांकित पदों में सन्धिच्छेद अथवा सन्धि करके उत्तर-पुस्तिका में लिखें :

Rewirte the underlined words of the following sentences in your answer-sheet after joining or disjoining sandhis : 1×3=3

(i) यथोचितं क्रियताम्।

(ii) कोऽनर्थफलः ? मानः।

(iii) कस्मिन् + चित् नगरे चन्द्रो नाम भूपतिः अवसत्।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु समासं विग्रहं वा कृत्वा पुनः उत्तरपुस्तिकायां लिखत :

निम्नलिखित वाक्यों में रेखाङ्कित पदों में समास अथवा विग्रह करके पुनः उत्तर-पुस्तिका में लिखें :

Join or disjoin the compounds in the underlined words of the following sentences and rewirte them in the answer-sheet : 1×4=4

(i) कथमत्र नते च उन्नते च विषमे मार्गे क्रीडथ?

(ii) अस्माकं क्षेत्रे सुवर्णपूरितः कलशः विद्यते।

(iii) दुष्टा बुद्धिः यस्य सः सद्वचनानि तिरस्कृत्य प्राचलत्।

(iv) सर्वेषामेव महत्त्वं विद्यते यथासमयम्।

**7.** कोष्ठके प्रदत्तान् प्रकृतिप्रत्ययान् योजयित्वा अनुच्छेदं पुनः लिखत :

कोष्ठक में दिए गए प्रकृति-प्रत्ययों को जोड़कर अनुच्छेद पुनः लिखें :

Rewrite the passage after joining suffixes to the roots or words given in brackets : 1×5=5

अस्माभिः विद्यालयं प्रति समयेन (i) __________ (गम्. तव्यत्)। ये छात्राः मार्गे (ii) ____________ (क्रीड्. शतृ) समयं नाशयन्ति, (iii) _____________ (गुण. इन्) जनाः तेषां (iv) _______________ (मूर्ख. तल्) दृष्ट्वा उपहसन्ति। (v) _______________ (आचार्य. टाप्) अपि तेभ्यः क्रुध्यति।

**8.** तालिकादत्तपदानि संयोज्य **पञ्च**वाक्यानि रचयत :

तालिका में दिए गए पदों को जोड़कर **पाँच** वाक्य बनाइए :

Frame **five** sentences with the help of the words given in the table : 1×5=5

| | | | |
|---|---|---|---|
| अहम् | शनैः शनैः | पुरस्कारं | करोमि। |
| | अधुना एव | भ्रमणाय | गच्छामि। |
| | ह्यः | वाराणसीं | आगता। |
| | श्वः | भोजनं | गमिष्यामि। |
| | यदा कदा | विद्यालयात् | प्राप्तवती। |

**9.** अधोलिखितवार्तालापे रिक्तस्थानानि पूरयित्वा उत्तराणि एव उत्तरपुस्तिकायां लिखत :

निम्नलिखित वार्तालाप में रिक्त स्थानों की पूर्ति करके उत्तर-पुस्तिका में लिखें :

Fill in the blanks in the following dialogue and write the answers in the answer-sheet : 1×3=3

माता — पुत्रि ! बहिः के आगच्छन्ति?

पुत्री — मातः ! बहिः भिक्षुकैः (i) ________________ ।

माता — पुत्रि ! किं ते भोजनं याचन्ति?

पुत्री — मातः ! (ii) ________________ भोजनं न याच्यते?

माता — तर्हि भिक्षुकाः किं वाञ्छन्ति?

पुत्री — मातः ! भिक्षुकैः (iii) ________________ (वस्त्र) वाञ्छ्यते।

**10.** अधोलिखितकार्यक्रमे अङ्कानां स्थाने संस्कृतपदेषु समयं उत्तरपुस्तिकायाम् लिखत :

निम्नलिखित कार्यक्रम में अङ्कों के स्थान पर संस्कृत शब्दों में समय उत्तर-पुस्तिका में लिखें :

Indicate the time in Sanskrit words in the answer-sheet in place of figures in the answer-sheet : 1×4=4

प्रातः (i) ____9.30____ वादने प्रार्थना, भक्तिसङ्गीतम्।

प्रातः (ii) ____10.15____ वादने मुख्यातिथेः आगमनम्, स्वागतम्।

प्रातः (iii) ____11.00____ वादने प्रतियोगितायाः प्रारम्भः।

मध्याह्ने (iv) ____12.45____ वादने निर्णयः।

**11.** अङ्कानां स्थाने संस्कृत संख्यावाचक-विशेषणपदानि प्रयुज्य उत्तराणि उत्तरपुस्तिकायां लिखत :
अङ्कों के स्थान पर संस्कृत संख्यावाचक विशेषण-शब्दों का प्रयोग करते हुए उत्तर-पुस्तिका में लिखें :
Replacing numerals with Sanskrit adjectives in the following sentences, write your answer in the answer-sheet : ½×4=2

अस्माकं ग्रामे (i) ___85___ कृषकाः सन्ति। तेषु (ii) ___3___ कृषकाः अस्मिन् वर्षे पारितोषिकं लब्धवन्तः। (iii) ___2___ भगिन्यौ मंगलगीतम् अगायताम्। (iv) ___1___ भगिनी जलपानव्यवस्थामकरोत्।

**12.** अधोलिखितवाक्यानां संशोधनं कृत्वा वाक्यानि पुनः उत्तरपुस्तिकायां लिखत :
अधोलिखित वाक्यों का संशोधन करके वाक्य पुनः उत्तर-पुस्तिका में लिखें :
Correct and rewrite the following sentences in the answer-sheet : 1×4=4

अहं प्रतिदिनं मातापितरौ प्रणमति, तौ च माम् आशीर्वादं यच्छतः — भवान् सुखी भवन्तु, सर्वेषां दीनजनस्य सेवां करोतु इति।

## खण्डः ख (Section D)
## पठित-अवबोधनम् (पठित-अवबोधन)
## Reading Comprehension

35 अंकः

**13.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानामुत्तराणि उत्तरपुस्तिकायां लिखत :
निम्नलिखित गद्यांश, पद्यांश और नाट्यांश को पढ़कर प्रदत्त प्रश्नों के उत्तर उत्तर-पुस्तिका में लिखिए :
Read the following prose, poetry and drama passages and answer the given questions in the answer-sheet :

(क) गद्यांशः

परशुरामकुण्डं तु लोहितनद्याः किञ्चिद्दूरे अस्ति। पूर्वम् इदं ब्रह्मकुण्डम् आसीत्। इदं लोहितनद्याः उद्गमस्थलम् इति मन्यते। अत्र अनेकानि दर्शनीयानि स्थलानि अपि सन्ति। अस्माकं पर्यटन-विभागेन प्रकाशितां केषाञ्चित् प्रसिद्धस्थलानां सूचीं पठित्वा ज्ञायताम् इमानि पर्यटनस्थलानि। एतेषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते। कार्यक्रमस्तु सुनिश्चितः।

**प्रश्नाः**

I. एकपदेन उत्तरत :
एक शब्द में उत्तर दीजिए :
Answer in one word : ½×4=2

(i) परशुरामकुण्डं कस्याः उद्गमस्थलं मन्यते ?

(ii) प्रसिद्ध-पर्यटनस्थलानां सूची केन प्रकाशिता ?

(iii) परशुरामकुण्डं पूर्वं किं नाम कुण्डम् आसीत् ?

(iv) कस्तावात् सुनिश्चितः वर्तते ?

II. पूर्णवाक्येन उत्तरत :

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence : 1×1=1

परशुरामकुण्डं कुत्र अस्ति ?

III. यथानिर्देशं उत्तरत :

यथानिर्देश उत्तर दीजिए :

Do as directed : ½×4=2

(i) 'एतेषाम्' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

(ii) 'अनेकानि' इति पदं कस्य पदस्य विशेषणम् ?

(iii) 'अपूर्णा' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(iv) 'अस्ति' इति क्रियापदस्य किं कर्तृपदम् ?

(ख) पद्यांशः

त्यक्त्वा धर्मप्रदां वाचं, परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं, भुंक्तेऽपक्वं विमूढधीः।।

**प्रश्नाः**

I. एकपदेन उत्तरत :

एक शब्द में उत्तर दीजिए :

Answer in one word : 1×2=2

(i) मूर्खः मनुष्यः कीदृशीं वाणीं त्यजति ?

(ii) मूर्खः मनुष्यः कीदृशं फलं त्यजति ?

II. पूर्णवाक्येन उत्तरत :

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence : 1×1=1

विद्वान् मनुष्यः कीदृशीं वाणीं वदेत् ?

III. यथानिर्देशं उत्तरत :

यथानिर्देश उत्तर दीजिए :

Do as directed : ½×4=2

(i) पक्वम् इति पदस्य किं विलोमपदम् ?

(ii) भुंक्ते इति क्रियापदस्य किं कर्तृपदम् ?

(iii) धर्मप्रदाम् इति कस्य पदस्य विशेषणम् ?

(iv) 'कठोराम्' इत्यस्य किं समानार्थकपदम् अत्र प्रयुक्तम् ?

(ग) <u>नाट्यांशः</u>

*अश्वत्थामा* — रे दुष्ट भीम! त्वम् अद्य वध्योऽसि मया। (विलोक्य) अये कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च। (स्वगतम्) इदानीं किं करवाणि? आः दृष्टम्, अस्मिन् विषमे समये ब्रह्मास्त्रम् एव मे शरणम्। मोचयामि अस्त्रम्। (ध्यानं नाटयति, ब्रवीति च) इदम् अपाण्डवाय।

*श्रीकृष्णः* — पार्थ! पश्य पश्य। एतत् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण। त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति। अर्जुन! त्वमपि मुञ्च ब्रह्मास्त्रम् एतत् निवारयितुम्।

*अर्जुनः* — नमः भगवते। स्वस्ति आचार्यपुत्राय। स्वस्ति मे भ्रातृभ्यः। उत्सृज्यते मया ब्रह्मास्त्रम्। अस्त्रम् अस्त्रेण शाम्यताम्।

**प्रश्नाः**

I. एकपदेन उत्तरत :

एक शब्द में उत्तर दीजिए :

Answer in one word : ½×4=2

(i) द्रोणपुत्रेण किं विमुच्यते ?

(ii) ब्रह्मास्त्रं किम् दहति इव ?

(iii) अर्जुनः सर्वप्रथमम् कं नमस्करोति ?

(iv) अर्जुनः ब्रह्मास्त्रं निवारयितुं किं विमुञ्चति ?

II. पूर्णवाक्येन उत्तरत :

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence : 1×1=1

ब्रह्मास्त्रस्य प्रयोगात् किं परितः प्रसरति ?

III. यथानिर्देशं उत्तरत :

यथानिर्देश उत्तर दीजिए :

Do as directed : ½×4=2

(i) 'दृष्ट्वा' इति स्थाने किं पदमत्र प्रयुक्तम् ?

(ii) 'विषमे' इति पदं कस्य पदस्य विशेषणम् ?

(iii) 'मुञ्च' इति क्रियापदस्य किं कर्तृपदम् ?

(iv) वाक्यं पूरयत — स्वस्ति मे __________ ।

**14.** अधोलिखित-पद्यद्वयस्य भावार्थम् उपयुक्तपदैः पूरयित्वा पुनः लिखत :

निम्नलिखित दो पद्यों के लिए भावार्थ उपयुक्त शब्दों से पूरा करके पुनः लिखिए :

Rewrite the following explanations of the two stanzas after completing them with appropriate words : 3+3=6

(क) तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।

भावार्थः

अतः हे भरतवंशे श्रेष्ठ अर्जुन! (i) __________ सर्वप्रथमम् (ii) __________ वशे कृत्वा एनं पापिनं मारय यः मनुष्यस्य समस्तं (iii) __________ विज्ञानञ्च नाशयति।

(ख) कोऽनर्थफलः ? मानः, का सुखदा ? साधुजनमैत्री।
सर्वव्यसनविनाशे को दक्षः ? सर्वथा त्यागी।।

भावार्थः

यस्य फलम् अनर्थः एव सः (i) ______________। का सर्वदा सुखं ददाति? सज्जनानां (ii) __________। कः सर्वाः विपदः नाशयितुं चतुरः? यः सर्वप्रकारेण (iii) __________ भवति।

**15.** अधोलिखित-पद्यद्वयस्य अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत :

निम्नलिखित दो पद्यों के अन्वय में रिक्त स्थानों को भरकर पुनः लिखिए :

Complete and rewrite the prose-order-renderings of the following two verses : 1½+1½=3

(क) कलहान्तानि हर्म्याणि, कुवाक्यान्तं च सौहृदम्।
कुराजान्तानि राष्ट्राणि, कुकर्मान्तं यशो नृणाम्।।

अन्वयः

हर्म्याणि कलहान्तानि, (i) _________ च कुवाक्यान्तम्,
राष्ट्राणि (ii) _________ , नृणाम् (iii) _________ कुकर्मान्तम् (भवति)।

(ख) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति, क्षयमायाति सञ्चयात्।।

अन्वयः

(हे) भारति! तव (i) _________ कोशः कः अपि अपूर्वः विद्यते।
(अयम्) (ii) _________ वृद्धिम् आयाति (iii) _________ च क्षयम् आयाति।

**16.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत :

रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए :

Frame questions on the basis of the underlined words : 1×4=4

(i) अनृतं वदसि चेत् काकः दशेत्।

(ii) सर्वेषां महत्त्वं विद्यते यथासमयम्।

(iii) सर्वः कामान् अवाप्नोतु।

(iv) द्वादशमासाः एव अक्षत्वेन गण्यन्ते।

**17.** घटनाक्रमानुसारम् अधोलिखितवाक्यानि पुनः लिखत :

घटनाक्रम के अनुसार निम्नलिखित वाक्यों को पुनः लिखिए :

Rewrite the following sentences in the sequential order : ½×8=4

(i) एकस्मिन् नगरे प्रच्छन्नभाग्यः नामकः कुमारः आसीत्।

(ii) मार्गः बहुभिः गर्तैः परिपूर्णः आसीत्।

(iii) एकः उद्दण्डः बालकः वदति - भवन्तौ किमर्थं सुपथं परित्यज्य कुपथेन गन्तुं प्रवृत्तौ ?

(iv) प्रच्छन्नभाग्यः बाल्यकाले विद्यां न प्राप्नोत्।

(v) तौ धनहरणार्थं ग्रामान्तरं प्रस्थितौ।

(vi) तौ मिलित्वा चौर्यकार्यं कुरुतः स्म।

(vii) प्रच्छन्नभाग्यः दुष्टबुद्धेः संगत्या चौरः अभवत्।

(viii) तौ मार्गे क्रीडतः बालकान् दृष्ट्वा अवदताम् - भोः किमर्थं विषमे मार्गे क्रीडथ ?

**18.** प्रसङ्गानुसारं शुद्धम् अर्थं चित्वा लिखत :

प्रसंग के अनुसार शुद्ध अर्थ को चुनकर लिखिए :

Select and write the meaning of words which are appropriate to the context : 1×3=3

(i) स राजा नगरस्य समन्ततः दानशालाः अकारयत्।

(1) अन्तिमे प्रान्ते

(2) सम्यक् प्रकारतः

(3) परितः

(ii) तत्र <u>अर्थिनाम्</u> समूहः अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्।

(1) धनिनाम्

(2) याचकानाम्

(3) व्यापारिणाम्

(iii) राज्ञः स्वेषु <u>गात्रेषु</u> अपि निरासक्तिं विज्ञाय सकलं जगत् व्याकुलम् अभवत्।

(1) अंगेषु

(2) चारणेषु

(3) स्तुतिगायकेषु